द्विरदादिभिः स्वोत्साहः स्वदते तद्वच्छ्रोतॄणामर्जुनादिभिः अत्रैतदुक्तं नहि काव्ये लौकिकशृङ्गारवत्सीतादिवि
भावादीनामुपयोगः किन्तु हि लोकविलक्षणेन प्राक्प्रतिपादितप्रकारेण तदेवमियता ग्रन्थेन रसादेर्विभावादि

३६

संयोगस्तस्याप्रकाशतोऽस्याप्रकाशश्च सिद्धमेव संभवतीति सिद्धत्वमेवाविरुद्धरूपं दर्शयति सामाजिकानां वा
सनात्मतया स्थितत्वात्तत्पूर्वानुभूतसंस्काराहितवासनात्मता चानादिः यज्जातीयस्य कर्मणो विपाकस्तदनुगुण
तयाप्रकाशनेऽस्य ये रत्यादीनामपि पूर्वानुभूतसंस्काररूपत्वेन वासनात्मकत्वमेवानादित्वेन तद्वा सिद्धत्वपर्यायम
खण्डत्वेन तत्त्वाविभावा दिसंयोगाद्विपाकानुगुण्यतया स्वप्रकाशनादस्फुटत्वेन तथा च वासनानां स्वप्रकाशत्वमप्यव
ण्डत्वे च योगशून्येन तत्तद्विपाकानुगुण्येनाभिव्यक्तिर्वासनानामिति तस्य च कर्मसंमिश्रत्वेन त्रिविधस्य
कर्मणो यो विपाकस्तदनुगुणानां तासां चानादित्वमाशिषो नित्यत्वात् इदं मे भूयात् इदं मे भूयादित्याशंसनं सर्वा
प्राणिनस्य सर्वस्य सर्वदा दृश्यते तच्च स्वाभाविकं जातमात्रस्याननुभूतभाविमरणस्य पुंसो द्वेषदुःखानुस्मृतिनिमि
त्तः कथं मरणत्रासो भवेत् न च स्वाभाविकं निमित्तमपेक्षते तस्मादनादिवासनानुविद्धमिदं चित्तं कर्मविपाक
निमित्तवशात् काश्चिदेव वासनाः प्रतिलभ्य पुरुषस्य भोगायोपावर्तत इति तस्मात्सिद्धमिदं येनादिरसास्वादा
सनावतः सहृदयाः सामाजिकास्तेषामेव विभावादिसंयोगात्काव्यनाट्ययोराविर्भवतीति न तेषां वासनादीनां
श्रोत्रियादीनामिति तथा चोक्तं सवासनानां सभ्यानां रसस्यास्वादनं भवेत् निर्वासनास्तु रंगान्तः काष्ठकुड्याश्म
संनिभा इति एवं विभावादीनां साधारण्येन तेषु वासनात्मकतया स्वप्रकाशत्वमखण्डत्वं च प्रतिपाद्य प्रमातृवर्ण
नैयत्ये रसादीनां सहाभेदापत्तिमाह नियतप्रमातृगतत्वे सति रसादिस्वरूपकार्यानुकर्त्रोः प्रागेवापाकारणाद्वियुतः र
सचर्वैयत्तत्तयातिश्चितत्वात्सोऽप्रमाता सामाजिकस्तत्तत्वेन स्थितोऽपि साधारण्योपायबलात्साधारण्येन सर्वेषां

का॰ त्वेनेष्टस्यासाधुत्वायोगसंबंधे वेते तस्मादिति विक्रमोक्तिविभावादिभिः तदुपायः तस्य बलादुद्रेकात् तत्कालस्वशुद्धोपसम
टी॰ विगलितस्वात्मपरिमितप्रमातृभावः इदमहं ममैवारितेत्यभिमानशून्यत्वमेवेत्यर्थः तस्य वशादुन्मिषितः
३२ प्रादुर्भूतः वेद्यवेदकयोः मायारूपत्वाद्वेद्यान्तरसंपर्कशून्यः अपरिमितभावः सर्वव्यापित्वे यस्य तादृशेन प्रमात्रा
37 तथैवात्मविशेषस्य तस्मादिति विशेषस्य सा तान्नकार्यविशेषस्य सम्बन्धित्वविशेषस्य विशेषसंबंधाग्रहणं तस्मात् साधारण्येन स्वाका
र इवाभिन्नोऽपि गोचरीकृतः ज्ञेयत्वात् ज्ञातानानात्मभेदेऽपि यथा साकारज्ञानवादिमते इदमहं ज्ञानाज्ञानात्मासमज्ञा
नामीति किं यावत् ज्ञानस्येदमिति कर्मैव वाच्यमस्ति यस्य विषयस्याहमिति कर्तैव वाच्यमस्ति तस्याभेदेऽपि य-
थाविषयविषयिभावस्तद्वत् सर्वोऽपि वेद्यान्तरसंपर्कशून्येन गोचरीकृतः विषयीकृतः तथा चर्व्यमाणतैका
ग्रतानुमेयत्वाभावात् अविलक्षणात् प्रमातृतात्पर्यैकप्राणः सहृदयसिद्धैतत्स्वरूपेण तदुक्तं तस्मादलौकिकः स
र्वेद्यः सहृदयैरयम् प्रमाणं चर्वणैवात्र स्वाभिन्ने विदुषां मते तथा विभावादिजीवितावधिः विभावाद्यव
स्थानावधिः कार्यकारणत्वादिपरित्यागेन समूहालम्बनात्मकः प्रतिभाससमपेक्षावधिः परिपाकसीमायस्य अ
सतिता विभावादिसमूहालम्बनैकप्रतिभासे रसो न स्यादित्यर्थः अत एव पानकरसन्यायेन चर्व्यमाणः यथा
पानकरसे खण्डमरीचादिसमूहात्मको खण्डादिभ्योऽतिरिक्तः कश्चिदपूर्व एव स्वादः तथा विभावादिसंयोजनादि
हापीत्यर्थः तदुक्तं कार्यकारणरूपत्वाद्विरूपाणामपि हि लोकतः रसोद्बोधे विभावाद्याः कारणान्येव ते मताः प्र
तीयमानः प्रथमं प्रत्येकं हेतुरुच्यते ततः संमिलिताः सर्वे विभावाद्याः सचेतसाम् प्रपानकरसन्यायाच्चर्व्य

माणो रसो भवेत् विभावाश्चानुभावश्च सात्त्विका व्यभिचारिणः प्रतीयमानाः प्रथमं खंडशो यांति संविदं ततो पत्तु
संयंते रसस्य लक्षणमव्यक्तावचर्वणादिप्रतीतिस्वरूपमाह प्रत्येकं परिस्फुरन्निमादि अत्र स्फुरणादीनां स्मृतंयमीलि
मत्वेन रसे उपचारादिवत्ग्राह्यप्रयोगः ब्रह्मास्वादमिवेसंचन्त्मत्कारकृष्णायां ब्रह्ममात्रमेव रसास्वादे तु विभावादिसं
गमोपीति भेदादिवग्राह्यप्रयोगः अत एवाह अलौकिकरसो लौकिकेष्व दृष्ट अलौकिकश्चमत्कारो विस्मयरूप
ऋत्विमादिः रसादिशब्दाद्धासशोकादिग्रहणेन रसादेः स्थायिभावो रसो भवतीति संबंधः एवं रसस्य लक्षण
मव्यक्तास्वरूपमाह स च न कार्यो विभावादिनाशेपि तस्य संभवप्रसंगात् नापि ज्ञाप्यः सिद्धस्य तस्याभावात् अ
पि तु विभावादिभिर्व्यंजितश्चर्वणीयः कारकज्ञापकाभ्यामन्यत्क्व दृष्टं न क्वचिद्दृष्टमित्यलौकिकत्वप्रसिद्धेर्भू
षणमेतन्न दूषणं चर्वणानिष्पत्त्या तस्य निष्पत्तिरुपचरितेति कार्योप्युच्यतां लौकिकप्रत्यक्षादिप्रमाण
ताटस्थ्यावबोधशालिमितयोगिज्ञानवेद्यांतरसंस्पर्शरहितस्वात्ममात्रपर्यवसितपरिमितेतरयोगिसंवेदविल
क्षणलोकोत्तरस्वसंवेदनगोचरतया प्रत्येयोभिधीयते तद्ग्राहकं च न निर्विकल्पकं विभावादिविमर्शनप्रधा
नत्वात् नापि सविकल्पकं चर्व्यमाणस्यालौकिकानंदमयस्य तस्य स्वसंवेदनसिद्धत्वात् उभयाभावस्वरूपस्य
चोभयात्मकत्वमपि पूर्ववल्लोकोत्तरतामेव गमयति न तु विरोधे इति श्रीमदाचार्याभिनवगुप्तपादाः भासमाने
ष्वेव विभावादिज्ञाने रतिः स्थायी हि रसो भवति यदि विभावादिज्ञानकार्यो रसः स्यात् तर्हि कारणज्ञानेन कार्य
ज्ञानेन युगपदप्रतीतिः कालो विभावादिज्ञाने नोल्लसेत् नहि चंदनस्पर्शज्ञानेन तज्जन्यसुखज्ञानस्यैवेक

पाठे न=२

का॰ टी॰ २८ 28

दा ऽभवतीति नापीति सर्वथा सिद्धाघटादयो दीपैः प्रदीपकैर्ज्ञाप्यन्ते न हि वेवं विभावादिभिः प्राग् असिद्धो विभावा-
दिसमूहालम्बनात्मकादेवास्य सत्वः कथं तर्हि भरतेन विभावादिसंयोगाद्रसनिष्पत्तिरिति सूत्रं पठ्यते अस्माद्धेतोरनन्तरमु-
क्तमित्याशङ्क्याह अपीतेति व्यंग्यव्यञ्जकभावेनात्र हेतुत्वमित्यर्थः एतदेव विवृणोति कारकेति स्फुटं।
कार्यताभावे रसनिष्पत्तिरिति सूत्रसंगतिः कथं कथं च ज्ञाप्यताभावे रसः प्रतीयते इति व्यवहारस्तत्राशङ्क्या-
ह चर्वणानिष्पत्त्येति विभावादीनां विमर्शस्वरूपस्यास्वादो हि चर्वणा सा च विभावादिसमूहालम्बनात्मैवे-
वेति निष्पत्तिः कार्यमुपचरितमस्येत्युपपद्यमानाप्यारोपितेति हेतोः कार्यमुख्यत्वे कार्यत्वेन व्याक्रियतामित्य-
र्थः ज्ञाप्यत्वव्यवहारमाह लौकिकप्रत्यक्षादीति लौकिकवस्त्वादिसाक्षात्कारजनकप्रत्यक्षानुमानादिप्रमाणेयन्न
स्माद्विलक्षणं वस्तु तथा नाटकस्थेनैव वेद्यवेदकरूपेणाभेदेनावबोधयोगजन्यमप्रत्यक्षमस्त्याऽतीतानागतसर्ववि-
षयतोऽप्रकाशः तेन शालितो योऽमितः योगिनः सम्यगवच्छिन्नमिथ्याज्ञानाश्राह रूढत्वो योगिनस्तेषां यन्ता-
न्तवेद्यवेदात्मकेन समाविलक्षणं वस्तु तथा वेद्यस्पर्शरहितस्वात्ममात्रपर्यवसितेन वस्तु परिमितेतरयो-
गिनां समाधिदार्ढ्येन सम्यगुक्तिस्त्र सर्वासन्नमिथ्याज्ञानानां संवेदने सम्यग्विदन्ते विनाशितसर्ववासने तत्त्वान्तेता-
स्माद्विलक्षणं वस्तु अत एव लोकोत्तरं वस्तु स्वसंवेदनेन स्वगोचरस्वसंतोहेतोः प्रत्यक्षत्वाद्योग्यमभिधीयता-
मभिधयया स्वरूपव्यापारेणास्वादात्मकेन बोध्यतानत्वपचारेणेत्यर्थः अत्र स्वसंवेदनस्य मानसत्वेन प्रत्यक्षा-
दिप्रमाणाच्चर्वणादिसंयोगजाद्विलक्षणमित्ययोगिज्ञानाद्वेद्यवेदनाद्विगलितवेद्यान्तरत्वेन विशेषः परिमि-

२८

नेनरयोर्गिसेवेदनाद्विनाप्युत्तसर्वव्यासनाद्रसादिवासनामयत्वेनभेदः तन्नाहकमिति इन्द्रियार्थसन्निका-
र्षमात्रेणज्ञायमानेनामजात्यादिविमर्शशून्येनहिनिर्विकल्पकस्यसहृदयविभावादिविमर्शेनप्रधानः कथंतन्ना-
ह्यस्यार्थः नापीतिनामजात्यादिविशेषणैर्विशेष्यावगाहिज्ञानेनहिसविकल्पकेनसमस्तस्यप्रकाशस्यवि-
भावादिभिः सहतद्विशेषणविशेष्यभावस्यार्थः उभयाभावेति निर्विकल्पकत्वाभावः सविकल्पकस-
विकल्पकत्वाभावोनिर्विकल्पकाभिन्नत्वप्रकारेणोभयाभावरूपस्याप्युभयात्मकत्वेलोकपरिविरुद्धेनन्विस-
त्यर्थः इतिश्रीमदिति विदुषएवतेषांतेसम्बन्धः तथाचवृद्धमातोक्तंप्रश्नोत्तरेमोहाज्ञानेशाहमध्यमाणहृदयस्य
वादश्यस्वरूपाताभ्योनुभावाः शृङ्गारस्यवरुणभयानकयोः स्वस्वविभावानुभावसमन्वादितत्तत्पार्श्वविनिविष्टा-
सादिवासनाः नतुरागाद्यनुक्रमात्स्वस्वविदितात्द्वावेणव्यापारसमनीयरूपोरसइतिवक्तुयदिविभावानुभावव्यभि-
चारिसंयोगाद्रसनिष्पत्तिस्तर्हिकेकस्यश्रवणभावाव्यभिचारिणोवृत्तिविभ[illegible]त्यापृच्छ्याह आह्रादयोवि-
भावाभयानकस्यवीरादृतेरौद्रादीनांचश्रृङ्गारादयोः नुभावाः शृङ्गारस्यवरुणभयानकयोः चिन्तादयो-
व्यभिचारिणः शृङ्गारस्यवीरकरुणभयानकानामितिपृथगनैकान्तिकत्वात्सत्रेमिलितानांनिर्देशः विभा-
वादीनांपृथक्स्थायीनिर्देशोनप्राधान्यतः एकस्मिन्नेवरसेकाव्यसाधारणकारणत्वप्राप्यावसरप्राप्तदर्शिताद
नैकान्तिकत्वेपतत्सपतावपिहेतुत्वंनमानमयाहेतोभासत्वेस्यात्तत्रसंविलष्ठ[illegible]रसइतितात्पर्यार्थः तथाहिव्या-
घ्रादयोभीरुतोबधोद्बोधकत्वेनभयानकविभावाः वीराणामन्याहवर्धनेनवीरविभावाः अपूर्वदर्शनामाश्च

का॰
टी॰
३९
39

श्चर्योद्दीपहाराऽङ्कुरविभावाः अपकारितातोक्रोधविभावनाद्दैन्यविभावाः तथैवविप्रलम्भशृङ्गारेयथाप्रिया
प्राप्त्युपायविमर्शनरूपाचिन्ताव्यभिचारितेनपोषिका तथैववीरेमहायात्रोतोचिन्ताकरुणे दीनोपकारक्रुतो
नोचिन्ता भयानकेभयहेतूनांनिवारणोपायचिन्तेति तथाचप्रतिरसेव्यभिचारिणोग्रेदर्शयितेरसतोनैकान्ति
कतयाविहारायामिति नातेदर्शितान्सर्वत्रसर्वेषांयथासम्भवंकारणत्वेनप्रतीतिमित्यर्थः तत्रविभावानुभावव्यभि
चारिणांक्वापिकस्मिंश्चिद्यथोक्तसद्भावेऽप्येकस्यैवसद्भावेकिमेतेषांस्वरूपाहेतवः किंवासमुदितानाऽश्रयाशंक्या
ह वियदलिमलिनाम्बुगर्भमेघंमधुकरकोकिलकूजितैर्दिशांश्रीः धरणिरभिनवाङ्कुराङ्कटंकाप्रणति
परेदयितेप्रसीदमुग्धे एवंपरिमृदितमृणालीम्लानमंगंप्रवृत्तिः कथमपिपरिवारप्रार्थनाभिःक्रियासु
कलयतिचहिमांशोर्निष्कलंकस्यलक्ष्मीमभिनवकरिदन्तच्छेदपाण्डुःकपोलः दूरादुत्सुकमागते वि
वलितंसम्भाषिणिस्फारितंसंश्लिष्यत्यरुणंगृहीतवसनेकिंचाञ्चितभ्रूलतं मानिन्याश्चरणानतिव्यतिकरे
बाष्पाम्बुपूर्णेक्षणंचक्षुर्जातमहोप्रपंचचतुरंजातागसिप्रेयसि अत्राद्ययोश्चपद्ययोर्विभावानामनुभावानामौत्सु
क्यव्रीडाहर्षकोपासूयाप्रसादानांव्यभिचारिणांकेवलसद्भावेऽपिस्थितिस्तथाप्येतेषामसाधारणत्वाभिमतसमस्त
मह्यापेतकत्वेनसत्तितानैकान्तिकत्वमिति यद्यपिप्रथमोदाहरणेकेवलानांविभावानांद्वितीयोदाहरणे
केवलानामनुभावानांतृतीयोदाहरणेकेवलानांव्यभिचारिणांचास्थितिमात्रादेशः तथाप्येतेषांविभावा
दीनांप्रत्येकमसाधारणत्वेविभावयेन्नित्यसाधारणत्वमेवंस्मरसोत्तत्रसमस्तमह्यापेतकत्वेविभावसा

कैरस्माद्विभावकत्वमसाधारण्यमेवत्वमनुभावव्यभिचारिणां कार्यसहकारिणां विना न संभवतीति तयोरा
वेषु तेषु लक्ष्या वेकस्मिन्नेको जनकेमानानादिशेऽस्मयोर्हर्षयोरेकोद्योगः प्रत्यासिद्धो विभावादिभिर्मिलितैः रसप्रतिष्ठि
तेनोत्तेकोऽतिक्रान्तेषु थक्ष्य कृथ यैवतेहेतनो मिलितावेतिशोकितं स्थायिप्रदत्तास्त्रोरसत्वयुः अतैकोतिकोते
कत्वनियतः सत्त्वियत्यवृत्तिनेयापेक्षाः तथा च विप्रलम्भेमालिनेसत्त्वमालाकेशालम्बनविभावे नायिकयामि
त्रा दिभिरुद्दीपनविभावैर्जनकैर्मोऽतितीनो वेष्टादयोऽनुभावमोहादयो व्यभिचारिणश्च व्यज्यन्ते तथापरिस्र
दित तस्मणालीसत्त्वविरहेणश्रुद्धाभिरनुभावैः मालाङ्कैः कार्योपलब्ध्या कारणानुमानमिति मायाः
त्वाश्रयेनेनालम्बनविभावो नायिकानिर्जनसन्निकालश्चोद्दीपनविभावः म्लानाङ्गतया कार्श्येन तत्कारणं वि
ताक्रियाः स्वप्रहर्त्तैः कारणमालस्यश्रमोऽतिवेदादयश्च व्यज्यन्ते हर्षोत्सुक्यामर्षत्रविवलितमिति व्रीडाप्रकाशित
मितिहर्षः अरुणमितिकोपः अचिन्तभूतमिति स्थायावाष्पामुखशरणमिति प्रमादश्चेति व्यभिचारिभिः केवलैर
पि स्वाश्रयेनालम्बनविभावो नायिकोद्दीपनविभावाश्चतदपराधप्रकाशकः कान्तादिर्व्यज्यन्ते तथैवोत्तरक्येनसानुभ
वोदीर्यतिः श्वसिताब्रीडयास्वविगोपनभूलेखनादि हर्षेणैरोमाञ्चालिङ्गनादिर्यथा कोपमोययोरसोऽसंभेदस्तथाग्र
वसते तथाहि अत्रप्रसन्नदृष्टिनिपटव्यभिचारिषु मानेनान्यतः प्रसादोदर्शयादिसञ्जातोसाहर्षवाचकामिति
तथा कोपासूययोरेकलक्षणेनापि कश्चिद्विशेषस्तथापि नप्रत्यवसंवेदनेहर्षः अपकारादिस्मरणजन्यकालुष्य
पगमस्त्वप्रसादः इति हर्षप्रमादयोर्भेदः अपि च अत्रोत्तस्य कार्यव्रीडाहर्षप्रमादव्यञ्जकत्वं व्रीडाहर्षमात्रव्यञ्जकत्वं व्रीडादीनां विकारा

कृ॰ टी॰
५
50

दितिजनितजनकार्याभिव्यंजितानां सहोच्चाराश्रयत्वस्य सत्त्वाद्व्यभिचारितस्योक्तत्वस्य समर्थनायेति ॥ एवं रसं सामान्यतो निरू-
प्य विशेषमवतारणिकापूर्वमाह तद्विशेषानाह शृंगारहास्यकरुणवीररौद्रभयानकाः बीभत्साद्भुतसंज्ञौ चेत्य-
ष्टौ नाट्ये रसाः स्मृताः ॥ तस्य सामान्यतो निरूपितस्य रसस्य विशेषा भेदाः अवस्थानुकृतिर्नाट्यमित्येवं लक्षणेऽभिन-
यात्मके दृश्ये नाट्ये अष्टावेव रसाः शान्तस्याभिनयासम्भवात् काव्ये तु श्रव्ये शान्तोऽपि नवमो रस इत्येतत्प्रतिपादनार्थं
नाट्यपदं तथा चोक्तं नाट्याचार्यैः रत्युत्साहजुगुप्साक्रोधो हासः स्मयो भयं शोकः शममपि केचित्प्राहुः पुष्टिर्नाट्येषु
नैतस्य प्रमोदितस्य समस्तव्यापारविलयरूपस्याभिनयायोगादिति भावः ॥ तदुक्तं न यत्र दुःखं न सुखं न चिन्ता न द्वेषरागौ
न च काचिदिच्छा रसः स शान्तः कथितो मुनीन्द्रैः सर्वेषु भावेषु शमप्रधानः ॥ तत्र शृंगारस्य द्वौ भेदौ संभोगो विप्रलम्भ-
श्च तत्राद्यः परस्परावलोकनपानपरिचुम्बनाद्यनन्तभेदत्वादपरिच्छेद्य इत्येक एव गण्यते तत्र रसाष्टकमध्ये शृंगा-
रः संभोगविप्रलम्भात्मकतया द्विधा तत्र द्विविधोपि शृंगारेष्वाद्यः संभोगाख्य एकविध एवापरिच्छेद्यत्वात् तथा चा-
लंकारग्रन्थान्तरेषु रम्यदेशकलाकालवेशभोगादिसेवनैः प्रमोदात्मा रतिः सैव यूनोरन्योन्यरक्तयोः प्रहृष्यमाणा
शृंगारो मधुरांगविचेष्टितैः ॥ आलम्बनं नायकाः स्युर्दक्षिणाद्याश्च नायिकाः चन्द्रचन्दनरोलम्बरुताद्युद्दीपनं मतं भ्रू-
विक्षेपकटाक्षादिरनुभावाः प्रकीर्तिताः त्यक्त्वौग्र्यमरणालस्यजुगुप्सा व्यभिचारिणः ॥ स्थायीभावो रतिः श्या-
मवर्णोऽयं विष्णुदैवत इति शृंगारस्य लक्षणं अथ तद्भेदलक्षणं दर्शनस्पर्शनादीनि निषेवेते विलासिनौ यत्रानुरक्तावन्यो-
न्यं संभोगोऽयमुदाहृत इति एतदेवोदाहरति यथा शून्यं वासगृहं विलोक्य शयनादुत्थाय किंचिच्छनैर्निद्राव्याज-

विमर्शाद्यप्रत्ययैरुपजन्यते इति शान्तरसव्यभिचारिवितर्कउदितः भयेपि दृश्यन्ते सेन्त्रकालावमन्तमो-
न्तकामिनीमानन्तकेन शृंगाररसव्यभिचारिणोपमर्द्यते तदपि दीपाणि भ्रंशमायमेकत्तिमितिरीतिमार्गानुसारा
देऽर्थे निर्धारणं मतिरिति गुणं नाम संचारिणा मतिभावेनोपमर्द्यते सा च शुद्धो कोपेपि कान्तं मुखमिति शृंगा
रसंचारिणामर्षेणोपमर्द्यते तदपि किंवदन्तिपकल्मषाः कृतनिश्चय इति शान्तसंचारिणा शोकयोमर्द्यते
सापि स्मरेऽपि सा दृष्टेर्भेणि सामर्थ्यं खेदन्तया तु स्वभवेदेत्य सुचकेनेइति देहेन शृंगारसंचारिणोपमर्द्यते तदपि चेतः
साम्यामुपैतीति ज्ञानाभीष्टगुमाद्येस्तत्समपूर्णेस्तदृता इति शान्तसंचारिणा हर्षेणोपमर्द्यते सापि कः स्व
लेषु वा यत्नोऽयं दासती निश्चितं वितानापि इति शृंगाररसंचारिणा चिन्तयोपमर्द्यते तदेवं शान्तसंचारिणो वितर्कम
तिशंकाधृतयः शृङ्गारसंचारिभिरौत्सुक्यस्मरणदैन्यचिन्ताभिरुपमर्दिता इति पूर्वपूर्वोपमर्दकत्वेनात्र शेषाणामुदया
भावानां शबलतेति यथा शान्ताद्यो भावस्य भावस्यास्तथा स्थितिरपि वा वस्थान्तरमित्याह भावस्यापि स्थितिरेका वे
दा हुतानि च नानेकोपपरा मुखेनास्वादिमा प्रशमादिभिरनपारमानताभावस्य भावस्थितिः सा च ज्ञानेकोपपरोत्य
शेषोदाहृता वोऽर्थः तथाह च विभावादिभिर्ध्वनितस्या व्ययाख्यस्य भावस्य प्रशमादिवि भाषियितन्तास्थितिर्वे
ति नन्वविभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिरिति समस्तालम्बनेनरसैगतेऽप्राप्तस्य संचारिणोभावस्य
भवतु कथं च नप्रधान्येनानकरस्य ध्वनितत्वेनमपि वादेस्तन्तप्रशमादीनां तरसानुपकारकत्तया कथं प्राधान्यमिता
ह स्वबोधेऽपि ते हि ते प्राप्नुवन्ति कदाचन ते भावप्रशान्तादयः अंगिते राजानुगतविवाहप्रवृत्तभृत्यवत्तु प्राह

का॰ प्र॰ धा॰

41

स्वत एव भावप्रमादेः प्रायासे पर्यवसानेन तस्यैव पर्यवस्यति यथा कस्य सुरारणपदानि वादित्रादि रूपचरि
तेन एव प्रेत [illegible] विस्मयकारिणि राज्ञो नुगतेति विवाहप्रसङ्गे राज[illegible]पर्यन्ततो [illegible] पर्यवसा
ति राजा यमेवानुग्रहकोयं [illegible] विवाहयतीत्यर्थः एवं विवक्षितान्यपरवाच्यध्वनौ संलक्ष्यक्रमव्यङ्ग्यतो
प्रदर्श्य लक्ष्यक्रमव्यङ्ग्यतां दर्शयन्नाह अनुस्वानाभसंलक्ष्यक्रमव्यङ्ग्यस्थितिस्तु यः शब्दार्थोभयशक्त्युत्थस्त्रिधा सक
थितो ध्वनिः शब्दशक्तिमूलानुरणनरूपव्यङ्ग्य इति त्रिधा घण्टादीनामभिघातजा [illegible] मानः शब्दोनुस्वानः
तत्रानुस्वाने यथा क्रमः संलक्ष्यते अभिघातजाकर्षादेरपरः शब्द उत्थित इति तथैव संलक्ष्यः क्रमो यत्र व्य
ञ्जकत्वात्मको यस्मिन् स्थाने शब्दव्यङ्ग्यस्य व्यङ्ग्यस्य स्थितिर्यस्मिन्नसौ ध्वनिस्त्रिधा कथित इति संबन्धः यथा स्वानानु
स्वानयोः क्रमो लक्ष्यते यद्वद्वस्तु लक्ष्यते तद्व्यञ्जकनामितर्थः एतदेव प्रपञ्चयति तत्र अलंकारोथवस्त्वे
व शब्दाद्यत्रावभासते प्रधानत्वेन स ज्ञेयः शब्दशक्त्युद्भवो द्विधा वस्त्वेवमनलंकारं वस्तुमात्रम् प्रधानत्वेनेति
अप्राधान्येन गुणीभूतव्यङ्ग्यतेत्यर्थः एतदेवोदाहरति आद्यो यथा उल्लास्य कालकरवालमहाम्बुवाहं देवेन ये
न जरठोर्जितगर्जितेन निर्वापितः सकल एव रणे रिपूणां धाराजलैस्त्रिजगति ज्वलितः प्रतापः आद्यः शब्द
शक्त्युत्थोलंकारध्वनिः अत्र वाच्यस्यासम्बद्धार्थाभिधायकत्वमा भूदिति प्राकरणिकाप्राकरणिक
योरुपमानोपमेयभावः कल्पनीयस्तत्रोपमालंकारो व्यङ्ग्यः कालो [illegible] सदृशो वासौ करवालः खड्गः
तस्माद्याम्बुवाहः पायितस्तेनैत [illegible] जलवाहः प्रवाहस्तमुल्लास्योच्चैः प्रदर्श्य येन देवेन ररा

४१

मुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखं विस्रब्धं परिचुम्ब्य जातपुलकामालोक्य गंडस्थलीं लज्जानम्रमुखी प्रियेण हसा
ता बाला चिरं चुम्बिता अत्र नायिकालम्बनेन शून्यं वासगृहमिति देशविशेष उद्दीपने चुम्बनमनुभावः लज्जा हासौ
व्यभिचारिणौ एभिरभिव्यक्तो भावः सहृदयेषु विभावानुभावसंयोगात् शृंगारतां भजते तथा तं मुग्धादिविनेवके
चुलिकपाप्यस्मिन्नोहारिणि लम्बोमिमम्पभियायितान्नियतम्मेनहीदिकांसे स्पृशाशायोपांतनिविष्टसस्मितसखीनेत्रोत्सवा
नन्दितो निर्यातः शनकैरलीकवचनोपन्यासमालीजनः तथा संभोगशृंगारप्रकारेण व अत्र नायकआलम्बने वी
टिकायाः वस्त्रग्रंथेः संस्पर्शोनुभावः स्मितहर्षौ व्यभिचारिणौ अत्र उक्तोऽपि रहः प्रदेशः सखीनिर्याणव्यञ्जितो उद्दीपनेषु
वं अत्र नायिकालम्बनमत्र नायक इत्येव विशेषः अपरस्त्वभिलाषविरहेर्ष्याप्रवासशापहेतुक इति पंचविधः अपा
योर्विप्रलम्भः लक्षणं वा संभोगाभावो यदा रतिर्नाम प्रकर्षमपि याति गच्छति नाधिगच्छति वाभीष्टं विप्रलम्भस्तदोच्यते इति
तथात्राभिलाषपदेन पूर्वरागोक्तिः तथा हि श्रवणदर्शनाभ्यामपि मिथः संरूढरागयोः दशाविशेषो योऽप्राप्तौ पूर्वराग
स उच्यते अभिलाषश्चिन्ता स्मृतिर्गुणकथनोद्वेगसंप्रलापश्च उन्मादोऽथ व्याधिर्जडता मृतिरिति कामदशा दशा विरहा
पदेनायोगः तत्रायोगोऽनुरागेऽपि नवयोरेकचित्तयोः पारतन्त्र्याद्दैवाद्वा विप्रकर्षादसंगमः अत्र प्रवासं व्रजतीत्यद
हरणपक्षाविरहोत्कंठितेत्यत्र तत्प्रोषितपतिकेति भावः तथा कान्तयोर्लब्धागमयोरागते कृतविघ्नौ पि दैवानायाति प्रिया
प्रियः तदनागमदुःखार्ता विरहोत्कंठितेति सा नानाकार्यवशाद्यस्याः दूरदेशगतः प्रियः सागतो भवदुःखार्ता भ
वेत्प्रोषितभर्तृकेति ईर्ष्यापदेन मानः मानः कोपः स तु द्वेधा प्रणयेर्ष्यासमुद्भवः द्वयोः प्रणयमानः स्यात्प्रमोदे सुम

का॰
टी॰
५२
52

द्वयमपि प्रेम्णः कुटिलगामितया कोपो यः कारणं विना पत्युरन्यप्रियासङ्गे दृष्टेऽथानुमिते श्रुते ईर्ष्यामानो भवेत्स्त्री-
णां तत्र त्वनुमितिस्त्रिधा उत्स्वप्नायितभोगाङ्कगोत्रस्खलनसम्भवेति प्रवासो भिन्नदेशत्वं एकदेशस्थयोरपि स्वा-
मादिकारणान्नियंत्रणे शापः नियंत्रणे दर्शनस्पर्शनाद्यभावः एतदेव दर्शयति क्रमेणोदा॰ प्रेमार्द्राः प्रणयस्पृशः परिचा-
यादुद्गाढरागोदयास्तास्ता मुग्धदृशो निसर्गमधुराश्चेष्टा भवेयुर्मयि यास्वन्तःकरणस्य बाह्यकरणव्यापाररोधी क्षणा-
दाशंसापरिकल्पितास्वपि भवत्यानन्दसान्द्रो लयः अत्र मालतीसाक्षाद्दर्शनप्ररूढरागस्य माधवस्याभिलाषेण प्रकर्ष-
नीतः पूर्वरागाख्यो विप्रलम्भः तथाप्यत्र मुग्धदृशादिभावेन तच्चेष्टाभिरनुभावैः आशंसापरिकल्पितास्विति गम्यैः
स्मृत्यादिभिर्व्यभिचारिभिः प्रकर्षं नीता माधवस्य रतिरभीष्टस्य प्रियालिङ्गनादेरनधिगमात्सहृदयेषु विभङ्ग्या पूर्वरा-
गाख्यविप्रलम्भतया परिणमति एवमभिलाषमुदाहृत्य सविरहमुदाहरति अन्यत्र व्रजतीति का खलु कथा नाप्यस्य
तादृक्सुहृद्यो मां नेच्छति नागतश्च हहहा कोऽयं विधेः प्रक्रमः इत्यल्पेतरकल्पनाकवलितस्वान्ता निशान्तान्तरे बाला
वृत्तविवर्तनव्यतिकरा नाप्नोति निद्रां निशि एषा विरहोत्कण्ठिता अत्र तयोः कयोश्चिन्नायकयोरनुरागिणोरप्रवा-
सितेऽपि गुरुपारतन्त्र्यादिना विप्रकर्षादयोगाख्यो विप्रलम्भः अत एव विरहोत्कण्ठितेत्युक्तं तथात्र नायकेनालम्ब-
नेनायोगकालेन चोद्दीपनेन अन्यत्र व्रजतीत्यादिना असमानाप्यस्य तादृक्सुहृदित्यादिना वितर्केणागतश्च हहहेति चिन्त-
यावेति व्यभिचारिभिः इत्यल्पेतरेत्यादिना नायिकाचेष्टाभिरनुभावैः प्रकर्षं नीता नायिकाया रतिरभीष्टतोप्रियसंगमादे-
नामनधिगमाच्चित्तमः सहृदयेषु द्रावणादयोगाख्यविप्रलम्भरसतामभजत ईर्ष्याविप्रलम्भमुदाहरति सा पत्युः प्रथ-

मेघरागसमये साक्षोपदेशं विना नो जानाति सविभ्रमांगवलनतावक्रोक्तिसंस्तवनम् सकैरवस्तु कपोलमूलगाति
नैः पर्यस्तनेत्रो मर्द्दलो केवलमेव रोदिति लुठल्लोलालकैरस्रुभिः साक्षुभीवरूपमेवा साक्षेतेनोपदेशः साक्षोपदेश ;
अत्र प्रवसरस्मासंगदर्शनादीर्ष्यामानः एवं वात्रनायकेनालम्बनेन ईर्ष्यासमयेन चोद्दीपनेन ईर्ष्याव्यभिचारिणा स्वभि
रनुभावैः प्रकर्षितो नायतिरभीष्टनो प्रियालिंगनादीनामनधिगमात्सहृदयेषु विनरुत्मामानाख्यविप्रलम्भरसतां
भजते प्रवासहेतुकमुदाहरति प्रस्थानं वलयैः कृतं प्रियसखैरस्रैरजस्रं गतं धृत्या न क्षणमासितं व्यवसितं चि
त्तेन गंतुं पुरः यातुं निश्चितचेतसि प्रियतमे सर्वे समं प्रस्थिता गंतव्ये सति जीवित प्रियसुहृत्सार्थः किमु त्यज्यते अत्र
प्रवासो भावी नायकेनालम्बनेन तत्समयेन चोद्दीपनेन प्रस्थानं वलयैः कृतमिति गम्यया कृशतया श्रमेण गतमेव
गतमिति स्वभिरनुभावैर्हसानेति वलनतयाव्यवसितमिति वितर्केण गंतमिति साविदेव न जीवितेमपाद्यवस्थानामामंत्रणं
वमिति नेत्रमार्दनवपुःह्नींनीतानायिकाया रतिः भाविप्रियप्रवासहेतुकयाभीष्टनो प्रियादर्शनामनधिगमपोषकया प्रवा
साख्यविप्रलम्भरसतया इति करणासहृदयहृदयेषु सदनेशापहेतुकमुदाहरति त्वामालिख्य प्रणयकुपितां धा
तुरागैः शिलायां आत्मानं ते चरणपतितं यावदिच्छामि कर्तुं अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे क्रूरस्तस्मिन्न
पि न सहते संगमं नौ कृतान्तः अत्र कान्तालम्बनेन चित्रलिखितदर्शनोद्दीपनेन कामीति मतिव्यभिचारिणा अस्रानुभावैः
पोषिताभिव्यक्तो नायिकस्य रतिरिष्टप्रियापादस्पर्शानवाप्तेः विप्रलम्भतां भजते अपि चात्र चित्रदर्शनसाक्षात्कृता
याः कान्ताया भावेनोपनीताया अभिन्नदेशत्वे जातेपि कृतान्तेनाय मसिद्धान्तदेवात्कुशलकर्मा स्वसंवेदनेन कृतो न सा

का॰ कुशलकर्मापर्यायस्यशापस्यापिहेतुत्वमेवेष्टस्यतच्चरणस्पर्शस्याऽप्राप्तौहेतुरितिशापहेतुकोयंविप्रलम्भः तथाचोक्तं
टी॰ विस्तरिकायांपकशायनस्ययोऽपिकोपादिप्रतिबंधेविप्रलम्भः तथाचोक्तंविस्तरिकायांपकशायनस्ययोऽपिकोपादि
५१ प्रतिबंधेविप्रलम्भः विदेशस्थयोरपिदंपत्योःसंप्रयोगादौसम्भोगः तस्माद्यदुक्तंदर्पणकारेणप्रवस्तूवेगागमानप्रवासका
रुणात्मकश्चतुर्थःपादितत्रप्रवासोभिन्नदेशत्वंशापात्कार्याच्चसंभ्रमादितिविरहशापहेतुकयोःप्रवासएवांतर्भावउ
43 क्तःसिद्धिसमेकदेशावस्थानात् तदित्थंप्रतिरसंविभावानुभावव्यभिचारिणामुदाहरणप्रपंचः पृथक्पृथग्ज्ञाति
प्रियाग्रथ्यादावववोध्यः हास्यादीनांक्रमेणोदाः आकृष्यपाणिमशुचिंममर्मूर्ध्निवेश्यामंत्राम्भसांप्रतिपदंपृष
तैःपवित्रे तारस्वरंप्रहितथूत्कमदात्प्रहारंहाहाहतोहमितिरोदितिविष्णुशर्मा अत्रविष्णुशर्माणमवलोकयतःकस्यचित्
नंविष्णुशर्माणंनेपथ्यवेशपरिहासनिक्षेपितेनदंतमवलोकयतःकस्यचिद्वृष्टुकस्यनेत्रविकासरूपोहासःस्थायि
भावः तदीयचेष्टानपश्रुत्वापाणिप्रहारेणोद्दीपितेनोद्दीप्यमानः तदीयैरेववागाडम्बराकैःशोकावहित्थापहृदादिभिःपु
ष्टिंनीतोमाधुर्येणहास्यरसतामजते तथाचहास्यलक्षणं विकृताकारवाग्वेशचेष्टादेःकुहकाद्भवेत् हास्योहा
स्यास्थायिभावोहितयामपरगोरसः विकृताकारवाग्वेशंयमालोक्यहसेज्जनः तदत्रालम्बनंप्राहुस्तच्चेष्टोद्दीपनं
तथा अनुभावोत्रनेत्रसंकोचवदनस्मेरतादयः निद्रालस्यश्रमग्लानिमूर्च्छाद्याव्यभिचारिणः आदिशब्देनावहि
त्थाचकरुणस्योदाहरणमिति हामातस्त्वरितासिकुत्रकिमिदंहादेवताःक्वाशिषोधिक्प्राणान्पतितोशनिर्हुतवहस्ते
ऽङ्गेषुदग्धेदृशौ इत्थंघर्घरमध्यरुद्धकरुणाःपौराङ्गनानांगिरश्चित्रस्थानपिरोदयंतिशतधाकुर्वंतिभित्तीरपि अत्र

कोविद्वान्महिषीं मत्तामालम्ब्यासन्नस्तत्परिजनस्य शोकः स्थायी तेनह्रपनन्दकुरीरवह्निमेयोगाद्येरुद्दीपितारोदः
नेतानुभावेनतद्युग्पेदैस्यग्लानिम्छुरीद्येर्व्यभिचारिभिः पुष्टिःनोत्तःसहृदयेषुकुत्तिकरुणाकरुणरसततयास्वदते
तथाचास्यलक्षणं इष्टनाशादनिष्टाप्तेःकरुणाख्योरसोभवेत् शोकोत्रस्याविभावःस्यात्क्रियाख्योत्रस्थायितमत्तेउ
रूपगुणन्तृणाद्याभवेत्सद्दीपनाकरः अनुभावादैवनिन्दाविलापस्वेनगात्रता श्वासक्रोशनपातेद्यानोरस्ताडनाति
वस्त्रवेष्टणावविवर्णतेरोदनाद्याःप्रकीर्त्तिताः अत्राष्टौसात्विकाजाड्यनिर्वेदग्लानिदीनताः चिन्ताविषादैत्सुक्य
चापलोन्मादमृत्यवः आलस्यापस्मृतिव्याधिमृत्युकाद्याव्यभिचारिणः रौद्रंदर्शयति कृतमनुमतंदृष्टंवायैरि
देगुरुपातकेमनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधैः नरकरिपुनासार्द्धं तेषांसभीमकिरीटिनामयमहमसृङ्मे
दोमांसैःकरोमिदिशांबलिं अत्रद्रोणाचार्यवधादपकारिणोर्जुनादीनालम्ब्यासन्नोश्वत्थाम्नःक्रोधःस्थायीवागारम्भाः
भैःशस्त्रोद्यमनाद्यैरुद्दीपितःप्रतिज्ञयावागनुभावेनायमहमिसत्नमोपलक्ष्यमाणेनगर्वेणव्यभिचारिणापुष्टिंनीतः स
हृदयेष्वतिशयेनविस्फूर्जनाद्रौद्ररसोभवति अस्यलक्षणंच रौद्रःक्रोधस्थायिभावोरक्तोरुद्राधिदैवतः आ
लम्बनमरिस्तत्रतच्चेष्टोद्दीपनंमतं मोष्टिकहस्तसंबक्रोक्तिकलावास्यादृष्टादयः आदिशब्देनमुष्टिप्रहारपातनकवि
हानच्छेदसंभ्रमात्संग्रामादयः हस्तनिष्पेषणदन्तघट्टनेनचरक्तता देहोष्ठस्फुरितभ्रुकुटीभुजास्फालनताडनाः स
गौरवकतात्मगतानिःश्वासोभ्रूनष्टचिता भर्त्सनेन्मथविधुतिर्हस्तपादतलक्षितिः भूभेदाधरकम्पाद्याअनुभावास्त
थोदिताः आवेगोजडतागर्वोनिर्वेदोमोहचापले असूयौग्र्यत्वामर्षश्रमाद्याव्यभिचारिणः आदिशब्देनसम्भ्रा

का॰ टी॰ ५४

५५

दयः सात्विकाः वीरमुदाहरति क्षुद्राः संत्रासमेते विजहत हरयो भिन्नशक्रेभकुम्भा युष्मद्देहेषु लज्जां दधति प
रममी सायका निष्पतन्तः सौमित्रे तिष्ठ पात्रं त्वमसि नहि रुषां नन्वहं मेघनादः किंचिद्भ्रूभङ्गलीलानियमितजल
धिं राममन्वेषयामि अत्र राममालम्ब्योत्पन्न इन्द्रजिन्निष्ठ उत्साहः स्थायिभावः तद्देहपलायनरामसंधयाचानुभाव
नावज्ञोदयनीतिपराक्रमेण गर्वेणाव्यभिचारिणा च पोषितः सहृदये प्रविश्य सा विस्ताररूपज्ज्वलनजननीनवीरसतो
भजते तथा चैतल्लक्षणं कार्यारम्भेषु संरम्भः स्थेयानुत्साह उच्यते उत्तमः प्रकृतिर्वीरः उत्साहस्थायिभाववान् आ
लम्बनविभावस्तु विजेतव्यस्तथा मतः विजेतव्यचेष्टाद्यास्तस्योद्दीपनकारणं अनुभावास्तु तत्र स्युः सहायान्वेषणाद
यः संचारिणस्तु धृतिमतिस्मृतिवितर्करोमाञ्चाः स च दानधर्मयुद्धैर्दयया समन्वितश्चतुर्धा स्यात् भयानकमुदाहरति
ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः पश्चार्धेन प्रविष्टः शरपतनभयाद्भूयसा पूर्वकायम् शष्पैरर्धावली
ढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति अत्र स्यन्दनमालम्ब्य
मृगस्य मरणभयं स्थायिभावः श्रमेणाव्यभिचारिणा पोषितः पश्चाद्ग्रीवाभङ्गेन पलायनेन प्रकटीकृतो रसिक
मनः स भयानकतया सद्यते तथा च भयानकलक्षणं यथा प्रोक्तो भयस्थायिभावो विज्ञैर्भयानकः व्याघ्रादयस्तु शि
वोल्लुकभल्लकारणप्रदर्शने अरण्यारण्यनिवासश्च शून्यतो वप्यपेते आलम्बनविभावास्तु आर्तनायाहादिलोकि
ताः व्याघ्रेस्तद्विचेष्टाविकृतस्वराणां सर्वेषां ग्रहणं चेष्टा घोरतरास्तस्य भवेदुद्दीपनं पुनः अनुभावोऽत्र वैवर्ण्यं
गद्गदस्वरभाषणं पुलकस्वेदरोमाञ्चकम्पादिकं लक्षणादयः जुगुप्सावेगसंमोहसंत्रासग्लानिदीनताः शो

कायस्मारसंभ्रांतिमरणाद्याव्यभिचारिणः ॥ बीभत्समुदाहरति ॥ उत्कृत्योत्कृत्य कृत्तिं प्रथममथ पृथूच्छोफ
भूयांसि मांसान्यंसस्फिक्पृष्ठपिंडाद्यवयवसुलभान्युग्रपूतीनि जग्ध्वा आर्त्तस्नायुनेत्रः प्रकटितदश
नः प्रेतरंकः करंकादंकस्थादस्थिसंस्थं स्थपुटगतमपि क्रव्यमव्यग्रमत्ति शावककालमदंतं प्रेतं पश्यतः पुंसि मा
ने विभावः सात्त्विकोऽनुभावान ग्राम्या स्थायिभावः मांसकृन्तनाद्यैरुद्दीपितः दृष्टीगारस्थानुमितेन सात्त्विको वा
दिभिरनुभावैरुद्वेगादिभिर्व्यभिचारिभिः पुष्टिं नीतः सहृदयानामभिप्रायेण विरिंचलसत्त्वे बीभत्सरसतया व
स्तकरोति बीभत्सादेश्चमत्कारित्वमलौकिकत्वेन निरूपितं प्राक् काव्यस्यास्य चमत्कारः सर्वसर्वेरसाश्रय इति ता
र्याद्वाङ्कारक्तनेसाधयमिन्नाद्यशमोलामेवस्पति अंकेवानिःसाधुक्तवार्थसंभेरादासानंदसंदोहः विकास
विस्तरक्षोभविक्षेपैः स चतुर्विधः हास्याद्भुतभयोत्कर्षकरुणानां त एव हि अतस्तज्जन्यता तेषामत एवावधारणे स्वा
स्वाद्यः मनसः काव्यार्थेन विभावादि संसृष्टात्मनात्मकवाक्येन सहसंभेदः संयोगो विप्रलंभसमुपस्थस्माद्दे
तोरात्मानन्दसंदोहस्तत्काले विगलितवेद्यांतरतया स्वाक्तिमचित्तेन सह प्रायः स्वादो समस्त चर्वणीयत्वेन मनसः
शृंगारविमर्षाद्विकासप्रमोदप्राप्तस्य भवतीति वीरविमर्षाद्विस्तररूपः योगप्राप्तस्य भवति बीभत्सविमर्षात्क्षोभरता
तिं प्राप्तस्य रौद्रविमर्षाद्विक्षेपव्याकुलतां प्राप्तस्य भवति एवमनेन क्रमेण हास्ये मनसो विकासः अद्भुते विस्तारः
भयानके क्षोभः करुणे विक्षेपः अत एव हेतोर्जन्यता शृंगारादिजन्यता तेषां हास्यादीनां अत एव मनसो

का॰
टी॰
४५
45

हन्तिवत्सश्यमस्कंदाय षष्ठेनेसवथानं लावच्छेदः तथावोक्तं शृंगारात्सभवेद्धास्यो रौद्राच्च करुणोरसः वीराच्चै-
वाद्भुतोत्पत्तिर्बीभत्साच्च भयानक इति अथ यद्यपि करुणादिकाव्यश्रवणादश्रुपातादिना सहृदयानां दुःखावि-
र्भावो हि दृश्यते तथापि पर्यन्ते चमत्काराद्यः सुखातिशयोऽनुभवसिद्ध एव यथा स्त्रीणां नखदन्ताद्यैः रणपतेः तत्संभा-
वे तासामपि वेदनायां सत्यां सुखातिशय एवेति तथा च बीभत्सलक्षणं जुगुप्सास्थायिभावस्तु बीभत्सः कथ्यते
रसः दुर्गंधमांसरुधिरादिकमालम्बनं मतं जुगुप्सनीयस्य गुणाभेदकः दीपनं पुनः निष्ठीवनास्य वलननेत्रसंको-
चनादयः अनुभावास्तत्र मतास्तथा स्युर्व्यभिचारिणः मोहोपस्मार आवेगो व्याधिश्च मरणादयः ॥ अथाद्भुतमुदाह-
रन्ति ॥ चित्रे महानेष बतावतारः क्व कान्तिरेषाभिनवैव भंगिः लोकोत्तरं धैर्यमहो प्रभावः काप्याकृतिर्नूतन एष
सर्गः अत्र महापुरुषदर्शनादुत्पन्नो विस्मयस्थायी महापुरुषगुणावलम्बनेन तद्गुणातिशयेनोद्दीपनेन वचसा वा गा-
त्रस्पन्दनिमेषादिभिरनुभावैः हर्षावेगैः संचारिभिः परिपुष्टः सहृदयानां चेतसो विस्तारात्मकं चमत्कारं जनयन्नद्भुतरसतां
भजते तथा चास्य लक्षणं अतिलोकैः पदार्थैः स्याद्विस्मयात्मा रसोऽद्भुतः विस्मयः स्थायिभावोऽस्य वस्तु लोका-
तिगं पुनः निर्निमेषतया दीर्घं रोमाञ्चः साधुवादनं अस्येको वशरीरस्य हर्षश्चेतोऽभ्युल्लसद्भ्रमः अनुभावाश्च यस्तस्य
स्वेदरोमाञ्चगद्गदाः आवेगहर्षजाड्याद्या अत्र स्युर्व्यभिचारिणः तथा चाद्भुतोदाहरणं नागानन्दे ग्लानिर्नाधिक
पीयमानरुधिरस्याप्यस्ति धैर्योदये मांसोत्कर्षणजा रुजोऽपि बहुतः प्रीत्या प्रसन्नं मुखं गात्रं यन्न विलुप्तमेष पुलकस्तत्र स्फु-

-टोल्लसंते हृष्टिर्मंयुपकारिणीवनिपतनस्थायिकारिण्यपि सर्वस्यैवकाव्यस्यपरमार्थतश्चमत्कारैकात्तदभेदेस-
मस्तानिस्थायिभेदात्कुत्सादिभेदेनभेदश्चनिस्थायिनःप्राह ॥एषांस्थायिनआह॥ रतिर्हासश्च शोकश्चक्रोधोत्साहौ
भयंतथा जुगुप्साविस्मयश्चेतिस्थायिभावाःप्रकीर्तिताः सहृदतिश्चनिरस्तसर्वविरोधित्वेनस्थायी तथाचमङ्गः
रसेचविरणपर्यंतंयमव्यक्ताद्यभिवारिणः व्याप्तिःसएवभावःस्यात्स्थायीमेवारिणःपरे नृपसनात्तनेऽयेपि अवि-
रुद्धान्विरुद्धावायोभावान्वशतांनयन् स्थिरोयावद्रसास्वादस्थायीभावउच्यते अविरुद्धैरपिस्पृष्टभावाःसंचारि-
णोखिलाः मध्येमध्येविलीयंतेनाहैस्तिस्थायितांततः अष्टैस्तादयस्तेतैतैस्तैर्नीतासप्रष्टता सम्पृष्टस्था-
यितायांतास्फविमर्शोविनन्विते अष्टानामेवभावानांसंस्कारायायितांततः सम्पृष्टस्थायितायांतास्फविमर्शोवि
तन्वते अष्टानामेवभावानांसंस्कारायायितामता तन्निरस्तसंस्कारातनस्थायितामताइति तथावैशेषावि
शेषलक्षणानि मनोनकूलेष्वर्थेषुसुखसंवेदनंरतिः देनोविकारोहासःस्याद्वपवेशादिवैकृतात् सदृष्टिका
मनामेष्टकपोलस्पन्दनादिकृत शोकइष्टवियोगादिष्विन्नकेशःकरैःस्मृतः विलापःपातनिःश्वासस्तुववैशेष
भ्रमादिकृत प्रातिकूल्यादिभिश्चित्तज्वलनंक्रोधउच्यते पारुष्यभृकुटीनेत्रलोहित्यादिविकारकृत स्थेयसीसा
धुभिःश्लाघ्याफलेयुद्धादिकर्मणि सततःप्रसानिर्मोषशानिरुत्साहइतिकीर्त्यते कालायवेहलंधैर्यंतत्रसोगोयमा-
दयः भयंचित्तस्यवैक्लव्यंमंत्रचोरत्वादिभिः आत्मसोपनह कंपशविवर्णभ्रमणादिकृत् जुगुप्सासादेह
यानुभावाश्चित्तमीलनं तत्रनिष्ठीवनवक्त्रकूजनंकंपनादयः लोकान्तरार्थतलीरविस्मयश्चित्तविस्तृतिः आ-

वा॰
प्र॰
५६
56

त्वसंनैवविस्तारस्मायुक्तिपुलकादयः अथव्यभिचारिभावान्कालभावैः सहचारित्वेन भावनात्तदभावादपेक्षयाभिचा
रिणएव निर्दिशति व्यभिचारिण आह निर्वेदग्लानिशंकाख्यास्तथासूयामदश्रमाः आलस्यं चैव दैन्यं च चि-
न्ता मोहः स्मृतिर्धृतिः व्रीडा चापलता हर्ष आवेगो जडता तथा गर्वो विषाद औत्सुक्यं निद्रापस्मार एव च सुप्तं वि
बोधोऽमर्षश्चाप्यवहित्थमथोग्रता मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचा-
रिणः तथाचव्रेग्यानतरादेतत्त्वतत्त्वं मोक्षान्तिविप्रयोगेर्ष्यासहितवेकादिकल्पितं स्वावमाननमेवात्र निर्वेद इति
कथ्यते अत्रचिन्तास्त्रुवैवर्ण्यदैन्यनिःश्वसितादयः औत्सुक्येनाभवेद्देहबलेशोषिकदस्यन्त तयाश्रमाध्वरत्याद्यैर्ग्ल
निर्निष्प्राणतामता कम्पोगजाड्यवैवर्ण्यकार्श्यदृग्भ्रमणादिकृत् सीयवैर्ययापराधाद्यैः परक्रौर्यादितस्तथा स्वानि
ष्टोत्प्रेक्षणं यत्र सा शङ्केत्यभिधीयते अत्रास्यशोषवैवर्ण्यदिक्प्रेक्षालीनतादयः द्वेषः परोदयेसूयास्यात्सौभाग्य
गुणादिभिः अत्रेर्ष्यानादरापेत्तादोषाख्यानानुगुण्यद्वापि अपहतिस्तिरोवीत्ताभ्रुवोर्भङ्गरक्ततादयः विवेकहृत्सोल्लासोम
यसम्भेदो मदोमतः मधुपानभवो नेत्रविक्रियासम्भवोपिच गमनस्खलवाणीस्खलनदृग्घूर्णनारुणिमादिकृत् अथपुन
रत्याद्युत्थः खेदः श्रम इतीर्यते निद्रास्वेदाङ्गसंमर्दजृम्भाश्वासादिभाग्यसौ सामर्थ्यस्यापि संज्ञाविक्रियानुत्सवता
हिया तृप्तिश्रमादिसंभूतं तदालस्यमुदीर्यते अत्राङ्गभंगोजृम्भावक्रियाद्वेषादिमर्दनं शय्यासनैकप्रियता
तन्द्रानिद्रादयोपिच दुःखदारिद्र्यमन्यात्मादैन्यंसौजितसत्वदीनता चाटुकन्मान्यमालिन्यचिन्तागजडिमादिकृत् ध्याने
चिन्ता भवेदिष्टानाप्तिकृतेर्निर्मितं अत्र श्वासायोमुखत्वभूलेखवैवर्ण्यनिद्रतादिकृत् विलापोत्तापकृशतावाष्पदैन्यसाद

योपिच मोहोद्भवस्तत्त्वानाहतादिश्लेषाद्व्यपतन्नुन्मया विषादादेस्तत्र स्यादेहस्य पतनं भुवि अक्षेन्द्रियत्वं भ्रमा
णेतथ्यानिश्चलत्वनादयः यास्यात्स्वीनुभूतार्थप्रतीतिः सदृशेक्षणां दृढाभ्यासादिनावापि स्मृतिः सा परिकीर्त्ति
ता भवेदत्रापि शिरःकम्पो भ्रूविक्षेपादयोपिच धृतिः स्यात्पूर्णतानातावज्ञःलोभाभावोत्तमाप्तिभिः सौहित्यवदनोल्लासस
हासप्रतिभादिकृत नवीनसंगमाकार्यस्तस्यावस्थादिनाकृतः अपूर्वतामवेद्ग्रीडा तत्र मौनेविचिन्तनम् अव
गुण्ठनभ्रूलेखस्तब्धायोमुखत्वादयः रागद्वेषादिभिश्चित्तलाघवं चापलं मतम् अत्राविचारपारुष्यस्वाच्छ
न्द्याचरणादयः अभीष्टलाभादिनानावेगः प्रसन्नता हर्षः स्यादत्र रोमाञ्चः स्वेदः स्फुरणफुल्लता आवेगोन्म
त्तताज्ञानतयामोहादयोपिच विभ्रमः संभ्रमोयः स्यादावेगोयं समाहृता प्रियाप्रियमहद्वेतोत्पातानवह्निमत्तादिजः प्रियोत्थे पुल
कः सान्त्वनापत्यादुत्क्रमादयः अप्रियोत्थे त्वपायपातविक्रोशभ्रमणादयः ... स्यागतिकम्पा...भीतनास्वादयो...
नोयावनकञ्चगात्रसंगोपनादिकृत ...विस्मयोत्कम्पितादयः गजेन्द्रायनोत्कम्पत्रासहृष्टेश्मवादयः
अरिजेवर्मशास्त्रादिग्रहापसरणादिकृत जाड्यमप्रतिपत्तिस्यादिष्टानिष्टाकृतीक्षणैः विहाणैषत्वतन्मोहात्सर्वावस्था
पराप्पिच अत्रानिमिषतानूष्णीभावविस्मरणादयः सौभाग्यरूपतारुण्यहेतुकगर्व उच्यते अत्रसोल्लुण्ठनं वाक्यहेलान्त
त्वरादायितांसोपोद्वानिह्नवोन्यस्यवचनेऽश्रवणादयः दृष्टानवाप्तिरब्धकार्यासिद्धिर्विपत्तिजः अपराधयितोपिस्याद
त्तापोविषण्णता अत्रोपायसहायानुसिद्धिश्विनाश्वरोदनम् विलापश्वासवैवर्ण्यमुखशोषादयोपिच कालाक्षम
त्वमौत्सुक्यमिष्टमिस्पृहादिभिः मनस्त्वापत्वरावितानिःश्वासास्थिरतादिकृत २ चिन्तातल्पतिसर्गकमादिभि

भा॰
प्र॰
४७

स्विन्नमीलननेत्रनिद्रा तन्त्रांगभङ्गुरत्वमानाज्ञाग्रहणमक्षिमीलनमार्त्तिस्युः इत्येवोन्यायात्तद्वैषम्यात्यदुःखत्स्विन्नविस्रवः अपस्मारो
ऽपतनेयावनास्फोटनप्रभाः भ्रमाः कम्पफेनस्रुतिर्बाहुक्षेपविक्रोशनादयः सुप्तोनिद्रामुपेतस्य विषयानुभवस्तु
यः इन्द्रियोपरतिः श्वासनेत्रनिमीलनादिकृत अविद्यामोहनिद्रार्थैस्साहाय्यः प्रबोधिता अंगवर्धोधूमितावायावि
द्योदयप्रबोधनः अधिक्षेपाक्षेपविशान्तिमवपातवरामादिकृत बाधोमोहस्तथाकृच्छ्रगथस्पर्शोऽमर्षेदैः दुर्गन्मीतन
रोमांचवपथुरोमन्थनादिकृद्भवेत् प्रतिसनादिभिर्निद्राघूर्णाद्यातस्तनयोभवेत् तन्त्रात्मर्दनशय्यामोक्षातु रूक्षतना
दयः अधिक्षेपावमानादेः स्यादमर्षोऽसहिष्णुता तत्र स्वेदः शिरःकम्पो विवर्णत्वे विचिन्तने उपायान्वेषणाक्रोशवैरमुख्य
नाडताडयः अवहित्थाकारगुप्तिर्भवेज्जाड्येन केनचित् अत्रांगादेः परोक्षस्य स्थानस्य परिगूहने अन्यत्रेक्षाहथावचेष्टावा
मंगभीत्यादिकाः क्रियाः अपराधकृतादिजातं वाग्दण्डमुग्रता वधबन्धः शिरःकम्पभर्त्सनोत्ताडनादिकृत् शास्त्रादी
नां विचारेणार्थनिर्धारणं मतिः अत्र कर्त्तव्यकारणसंशयभ्रमयोश्छिदा उपदेशश्च शिष्याणामूहापोहादयोऽपि च दो
षोद्रेकवियोगाद्यैर्व्याधयोऽपि ज्वरादयः इह तत्सम्भवो भावो व्याधिरित्यभिधीयते अत्र स्तम्भश्लथाङ्गत्वश्वासोन्नापक्षमा
दयः उन्मादो हृद्भ्रमः प्रोक्तो नन्दापहितदाहजः अत्रास्थानेहासरुदितगीतासम्बद्धचेष्टिते प्रलापधावनाक्रोशविपरीतक्रि
यादयः विषादश्चाधिभिस्त्रासः संप्रहारक्षमादिभिः प्राणिनामेतस्य स्तम्भमहाकारणमाश्रयं विवर्णगात्रतास्वास
मोऽर्दितहिक्कादयः क्रियाः पार्श्वस्थालम्बरोमांचकम्पस्तम्भभ्रमादिकृत् विमर्शात्संशयाद्यैश्च वितर्कस्त्वयमुच्यते एष
भ्रूपाणिशिरोऽङ्गुलिनर्त्तनादिकृत् त्रयस्त्रिंशदमी भावाः समाख्यातास्तु नामतः अमीभ्योऽपि समेपोषकाश्चित्तवृत्तिविशे

तद्रूपभावापत्तेषामेवानुभावसद्रूपानुप्रवेशात्तत्स्थायिव्याख्यानात्स्तत्स्वयमिति शान्तमेते कोनत्वपरेषामभावात् तथा
चोक्तं शारीरेन्द्रियवर्गस्य विकाराणां विधायकाः भावा विभावजनिताश्चित्तवृत्तय ईरिताः मात्सर्योद्वेगदम्भेर्ष्यावि
वेकानिर्णयस्तथा क्लैब्यं क्षमाकुतुकोत्कण्ठाविनयोपि च संशयो धार्ष्ट्यमित्याद्या भावा ये स्युः परेपि च उक्तेष्व
न्तर्भवन्त्येतेन पृथक्तेन दर्शिताः तथाहि असूयायां हि मात्सर्यं त्रासे पुद्वेग एव च दम्भस्तथावहित्थायामीर्ष्यामर्षे
मतावुभौ विवेकनिर्णयश्चनिर्दैन्ये क्लैब्यं समाप्यतौ औत्सुक्ये कौतुकोत्कण्ठे विनयस्तु तथा मतौ संशयोन्तर्भवे
त्कैतर्थायां धार्ष्ट्यं चापले यद्यप्येवांरभावानां मध्ये कस्यचनकस्यचित् विभावाश्चानुभावाश्च भवेद्व्यपरस्परं निर्वेदस्तथा
त्वेर्ष्यायां भवेदत्र विभावता असूयायां पुनस्तस्यां व्यक्तमेवानुभावता औत्सुक्यं प्रति चिन्ताया कथितात्रानुभावता ।
द्वेप्रति विभावत्वमेवं स्वेत्यापरस्परमी यद्यप्येवमान्तिकानान्तु तथा नान्यक्रियानतेः कार्यकारणभावस्तु ज्ञेयः प्रायेण तो
कृतः निद्रायास्तु विभावत्वं वैवर्ण्यामर्षयोर्मते असूयायां पुनस्तस्य कथितैवानुभावता प्रहारस्य विभावत्वं संमो
हप्रलययोः प्रति मोगं प्रति त्वनुभावत्वमेवं स्यात्याः परेपि च आलस्ये श्रम आलस्यमथ बोधार्थविवर्जितो संचारिणा
मिह क्वापि भवेद्व्यस्यानुभावता मात्रकृतेनैसम्बन्धः षड्भिः स्थायिभावादीभिः सह स्यान्तत्परस्परयाकिंतलीलानुगुण
ता कृते धृतिकेमतिनिर्वेदश्चतोनोत्स्मृतिहर्षयोः बोधश्च येस्तस्यानोकाविर्भूतिविभावेनेति तथाच भरतेपि
रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा जुगुप्सा विस्मयश्चेति निर्वेदग्लानिरेव च शंकासूयामदश्रमो आल
स्यं दैन्यमेव च चिन्ता मोहो स्मृतिर्धृतीव्रीडा चपलता तथा आवेगो हर्ष जडते विषादो गर्व एव च औत्सुक्यं च तत्।

रा॰ तोनिद्रातथापस्मारएवच सुप्तंप्रबोधोमर्षश्चाप्यवहित्थमथोग्रता मतिर्व्याधिस्तथोन्मादस्तथामरणमे
प्र॰ वच त्रासश्चैववितर्कश्चसप्तमसेतीहदशोपरं॰दौततःपरं रोमांचःस्वरभेदाश्चवैवर्ण्यंवेपथुस्तथा अश्रुप्रल
५८ यश्चैवमत्रहि स्तंभस्विन्नत्वमष्टमः अंतःकरणवृत्तीनांमानेतेपिश्रुतानैः प्रोक्ताएकोनपंचाशद्भावास्तेयोगाद्रसो-
५८ दयः तेष्वष्टौस्थायिनःपूर्वेत्रयस्त्रिंशत्ततःपरे संचारिणःपरेत्वष्टौसात्त्विकाःसंप्रकीर्तिताइति अपिचात्रत्रय
स्त्रिंशदिमेपरतन्त्र्येणयत्ररूपे रत्यादयोप्यनियमात्संचारिणः तथाहिशृंगारेतुक्रियमाणत्याव
स्थितास्थायिशाहवाव्यागत्रिसवदास्यपुनः पुनस्तत्पृच्छमानाभिव्यभिचारीविवर्णएयंतमितिप्राग्रसव्यभिचा
रत्वेलक्षणयोगात् तथावस्थायिनामेवरसांतरेषुसंचारितास्रृंगारवीरयोर्हासोवीरक्रोधस्तथामतः प्रो
तेत्रगुप्साकाथितात्व्यभिचारितयापुनः इत्याद्यस्तत्सनुत्रेयस्तयेभावितबुद्धिभिः तेष्वेवसंचारित्वेनान्ये
ताः प्राग्भावमष्टसात्त्विकलक्षणंयथा परिणाममुद्भावक्रमयत्सभावेस्मृतः देहसपरिणामास्ते
सात्त्विकापरिकीर्तिताः सत्त्वेयद्यपिविभक्तफलाःस्युर्भयोद्भवन्तिनित्येसंज्ञीभवत्यान्यसेवनात्मानम
इद्म प्राणस्तुविक्रियांगच्छन्देहविलोभयत्पलम तदास्तम्भादयोभावाःसम्प्रदृहीभवेत्समी चत्वा
रिस्याद्भूतानिप्राणेनानुविलम्बते कदाचित्प्रधानःसंदेहेहवर्ततेसर्वतःस्तम्भंभूमिस्थितःप्राणस्तु
तोयस्थस्तुतापस्यः तेजस्थःस्वेदवैवर्ण्यप्रलयौवियदास्थितः एवस्थपवक्रमानन्तमथप्रतीत्रमयेदमाक्रे
मावकम्पवेपथोस्त्रीणितनोत्पुनः बहिःसंतस्तुविचेषाविधायिनःततःस्फुटम् प्रोक्ताअनुभावतामेषां

भावतां च मनीषिभिः तथा च विशेषलक्षणं स्तम्भो हर्षभयाश्चर्यविषादामर्षसंभवः तत्र वागादिरहितो
नैश्चल्यं शून्यतादयः स्वेदो हर्षभयक्रोधादिजः क्लैशिकरस्ततो रोमाञ्चो यः किलाश्चर्यहर्षोत्साहभयादिजः
रोमाणां समुद्गमस्तत्र गात्रसंस्पर्शनादयः विषादविस्मयामर्षहर्षभीसादिसंभवं वैस्वर्यं स्वरभेदः स्यादेष
देषगद्गदतादिकृत् विश्वासामर्षहर्षाद्यैर्वेपथुर्गात्रलौल्यकृत् विषादरोषभीत्याद्यैर्वैवर्ण्यं वर्णविक्रिया भा-
वस्तैस्तत्र मालिन्यकार्श्याद्याः परिकीर्तिताः हर्षरोषविषादाद्यैरश्रु स्यान्नेत्रजं जलं तदादयः हर्षजे स्फालिङ्गीतत्वमौ-
-रोषादिसंभवे सर्वत्र नयनस्तोभरागसंमार्जनादयः प्रलयः सुखदुःखाभ्यां चेष्टाज्ञाननिराकृतिः तत्रानु-
भावाः कथितास्तत्र महीनिपतनादय इति अत्र सरस्वतीवरजस्तमोध्याममस्य हि विरसं सत्त्वमिहोच्यते निर्हेतये स्यता-
द्योगासंभवेनीति सात्त्विका इति अथ च सत्यपि कोनपंचाशते च भावानां तत्त्वेषु त्रिष्वपि विशेषतः स्तम्भादीनेव गु-
नः समाहितस्थिरैरेव सहृदयैरभिनेयतामुपयान्तीति तेन सात्त्विकताव्यपदेशः तथा च भरते सत्त्वं चान्तर्गतं स्थायिभावाः सं-
वारिणस्तथा चित्तस्य परिणामाः स्युः सात्त्वाः स्तम्भादयः पुनः परिणामस्य देहोऽत्र ग्राहकस्तत्समुद्भवाः ततः देहस्य प-
रिणामास्ते सात्त्विकाः परिकीर्तिताः व्यापिकत्वेशक्यतेनैते विनिश्चितमानसैः भ्रूविक्षेपकटाक्षाद्याः सर्वे स्वेदादयः
पुनः समाहितान्तःकरणैरेवाभिनयगोचराः तस्मात्सत्त्वैकनिष्पन्नाः स्तम्भाद्याः सात्त्विका मताः स्तम्भस्वेदादि-
भिर्गम्यायाः काश्चिच्चित्तवृत्तयः तासु स्तम्भादयः प्राहावर्तितेलक्षणबलात् तेन भावत्वमप्येषामुपलभ्यहेतेविशु-
स्नते इति रसादेरन्वदर्शनादेतेषामनुभावतापि तथा च दर्पणे उक्ताः कारणैः स्वैः स्वैर्बहिर्भावप्रकाशकः लोके

वा॰
श्रं॰
५२

४९

यः कार्यरूपः सोऽनुभावः काव्यनाट्ययोः ॥ उक्ताः स्त्रीणामलंकारा अंगजाश्च स्वभावजाः ॥ तद्रूपाः सात्त्विका भावास्त-
थाचेष्टा परा अपि ॥ एवमेकस्यैव स्थायिनो व्यभिचार्यादिभावोद्भावयिता शान्ताख्ये नवमे रसे तत्त्वयेति निर्वेदस्य
मंगलप्रायस्य प्रथममनुपादेयत्वेऽपि उपादाने व्यभिचारित्वेऽपि स्थायिताभिधानार्थं तेन निर्वेदस्थायिभावोऽस्मि
ञ्छान्तोऽपि नवमो रसः ॥ निर्वेदस्य विषयवैराग्यात्मकत्वेन शृंगारादावंगत्वेन भावः यथा रत्यादेः स्थायिनो
पि हास्यादौ व्यभिचारित्वं तथा व्यभिचारिणोऽपि निर्वेदस्य शान्ते स्थायित्वमिति तात्पर्यं तथा चोक्तं स्थायी स्या-
द्विषयेष्वेव तत्त्वज्ञानाद्भवेद्यदि इष्टानिष्टवियोगाप्तिकृतस्तु व्यभिचार्यसाविति तस्मात्सिद्धमेतत् तत्त्वज्ञानजो
निर्वेदः शान्तरसस्य स्थायी कारणं तदन्यस्तु रसान्तरे व्यभिचारीत्यादिति तत्र शान्तरसः निर्वेदस्थायितां प्राप्तः ॥
शान्तोऽस्मिन्नवमो रसः ॥ अनित्यतादिनाशेषवस्तुनिःसारता तया ॥ परमार्थस्वरूपं वा तत्स्यात्तत्त्वमिष्यते ॥ पु-
ण्याश्रमहरिक्षेत्रतीर्थरम्यवनादयः ॥ महापुरुषसंगाद्यास्तस्योद्दीपनकारिणः ॥ रोमांचाद्याश्चानुभावाः ॥ उँत
स्तथा स्युर्व्यभिचारिणः ॥ निर्वेदहर्षस्मरणमतिभूतदयादयः ॥ एतदेवोदाहरति यथा अहौ वा हारे वा कुसु-
मशयने वा दृषदि वा मणौ वा लोष्ठे वा बलवति रिपौ वा सुहृदि वा तृणे वा स्त्रैणे वा मम समदृशो यान्ति दिवसाः
क्वारण्ये पुण्ये शिवशिवशिवेति प्रलपतः ॥ अत्र कस्यचिदुपशान्तस्य महापुरुषस्यानित्यतापरिभावितेन जगता
लब्धोऽस्पष्टो निर्वेदः पुण्यारण्याद्यैरुद्दीपितः सर्पहारादिभिरनुभावितः वनेवागान्वमितैर्धृतिमतिहर्षाद्यैः
संचारितः सहृदयेषु शमस्मतया स्वदते ॥ यथावसानानवतमेव नाधिकत्वेन वासूतत्वेति तथानुपदमेवाग्ररूपं

५२

ते एवमेतत्क्रमेरसेनत्तयिनाभावादीन्तत्तयति रतिर्देवादिविषयाव्यभिचारी तथोर्जितः भावः प्रोक्तः आदिश
ब्दान्मुनिगुरुनृपपुत्रादिविषया कान्ताविषया तु व्यक्तः शृङ्गारः येन प्रकारेण कान्ताविषया रतिर्विभावा
नुभावव्यभिचारिभिरभिव्यक्ता शृङ्गाररसउक्तः तेनैव प्रकारेण देवादिविषया रतिर्विभावाद्यैः प्राधान्येनाभिव्यक्ता
शृङ्गाररसउक्तः तेनैव प्रकारेण देवादिविषया रतिर्भावाद्यैरूर्जिता प्राधान्येनाभिव्यक्ता भावसंज्ञयोक्ता एवं व्यभि
चारिभावश्च विभावाद्यैरभिव्यक्तो भावसंज्ञस्तत्रान्वयः हन्मादिशब्दादेरयमभिप्रायः प्रेयो वत्सलतमस्त्वोनेतिया
यिकारसभेदा उक्ताः प्राच्यैः ते भावसंज्ञयैव गतार्था ज्ञेया इति तथा वैतेषां लक्षणानि ग्रंथान्तरेषु अयथभेदयी।
हृयारतेः प्रीत्यादिनश्यते गाढानुकूलतत्तात्मत्राम समतेन सदाश्रिता कम्मभक्तेष्वनुग्राह्यस्याविस्रज्येष्वनुक्रमात्
त्रिविधेपुत्रयेप्रीतिः सा व्यवत्सलतात्मिसोऽभ्रप्रीतिः स स्मान्स्त्वेतियेन्द्रतास्तेन्वग्राह्याहरेर्मताः आराध्यतात्मि
कातेषां रतिः प्रीतिरितीरिता अस्या एव भक्तिसंज्ञायेतत्वत्वात्मानुकम्पास्पदेसहायाः मता मताः सास्माहिस्नम
तेषां भक्तिः सा तु स्निह्यन्ते गुरवो ये हरेरस्य तेषु ज्या अत्र विक्रान्ताः अनुग्रहमयी तेषां रतिर्वात्सल्यमुच्यते इत्यादि
रसान्तरसिंधौ रसार्णवोप्यः एतदेव क्रमेणोदाहरति क्रमेणोदाकंठकोणविशेविशेषमीशानेकालकाटमपि मेमहा
मतं अपुपान्नमम्नतेभवृष्ठपुमें देहान्नियादिरोविनितनमे अत्रभक्तस्य महादेवमालम्ब्याज्ञा रतिरीशनेनोद्दीपन्य
स्त्वेनिरूपणानुभावेन प्रकटीकृतार्थ्याशान्तस्माद्व्यर्थान्निर्वेदनिर्मादात्म्यादिभिः संचारिभिः पुष्टिं नीता रसिकाशु
भावसंज्ञयास्वदते सति चाप्रशान्तरसे भावस्यैव प्राधान्येन निर्देशः तथा चोक्तं संचारिणः प्रधानानि देवादिविषया

वा॰ रतिः उद्बुद्धमात्रसम्याद्यौ भावशब्देनाभिधीयते अस्यार्थः विभावानुभावव्यभिचारिभिः सत्यपि संयोगे यत्र प्रधान्येन रति
प्र॰ रेवतान्वयेत्यचमत्कारिणी तत्र भावसंज्ञा तथा चैतद्देवादिविषया रतिः सचैवमपरत्वेऽपि कचिद्देशसत्त्वेन ना नृपालमेवक
भ॰ सेवप्रभृतिमकरन्देश्वरादिविषयालोचनयैव व्यभिचारिप्राधान्येऽपि विशेषं मुनिविषयमुदाहरति इत्यादिविषयं प्रतिदेवता
50 रेघ्यतः शुभमपूर्वाचरितैः कृतं शुभैः शुभैः स्वभाजा भवदीयदर्शनं व्यनक्ति कालत्रितयेऽपि योग्यतां अत्रैवं मुनि
मातम्ब्यासम्ना रतिरत्र हृदयगोचरोहृदीपिता स्वातिशयेनानुभावेन प्रकटी कृता मुनिमाहात्म्यादिभिर्व्यभिचारिभि
र्भिः पोषिता भावसंज्ञया चमत्करोति अत्र मुनिमातम्ब्यासम्ना रतिः स्थायिभावो विभावादिसंयोगादसौ भूयव
त्तत्वमतां प्राप्नोति भरतमुनिमतस्य ग्रन्थकृता भावशब्देनोक्त रतिप्रपञ्चः एवमन्यदुदाहार्यं एवं रतेर्भावा
नामुदाहृत्य व्यभिचारिणमुदाहरति व्यभिचारी यथा जाने कोपपराङ्मुखी प्रियतमा स्वप्नेऽद्य दृष्टा मया मा मा सं
स्पृश पाणिनेति रुदती गन्तुं प्रवृत्ता ततः नो यावत्परिरभ्य चाटुकशतैराश्वासयामि प्रियां भ्रातस्तावदहं शठेन वि
धिना निद्रादरिद्रीकृतः अत्र विधिं प्रत्यसूया अत्र नायिकामालम्ब्यासूया रतिः कोपेनोद्दीपिता परिरम्भणचा
टुकशतैरनुभावि ताविधिं प्रति शठपदव्यङ्ग्ययासूयया सं चारितावाभिलषितस्य तदाश्वासनस्यानधिग
माद्विप्रलम्भरसत्वेन परिणताऽपि नायिकासंस्पर्शेव विद्वेषविधिं प्रत्यसूयायाः उत्कटत्वाद्भावसंज्ञा एवमन्यच्च र
सभावयोः प्राधान्याप्राधान्यकृतो भेदः तदुक्तं यथा महीपतेर्विवाहादेरेको भावोऽपि यान्तिके उद्रेकः कश्चिदन्याऽपि
तथा संचारिणो रसे एवं भावं तत्तयित्वा तदाभासं तत्तयति तदाभासाद्यनौचित्यप्रवर्तिताः तदाभासाः रसाः भा

साभावाभासाः तयो रसभावयोराभासत्वेन समासः अनौचित्येन प्रवृत्तो रसो रसाभासः एवं भावाभासोपी
त्यर्थः तथाचोक्तमनौचित्यं उपनायकनिष्ठायां मुनिगुरुपत्नीगतायां च बहुनायकनिष्ठायां रतौ तथा
उभयनिष्ठायां प्रतिनायकनिष्ठे तद्वदधमपात्रतिर्यगादिगते शृङ्गारेनौचित्ये रौद्रे गुर्वादिगतकोपे शा
न्ते च हीननिष्ठे गुर्वाद्यालम्बने हास्ये ब्रह्मवधाद्युत्साहे धमपात्रगते तथा वीरे उत्तमपात्रगते भयानके ज्ञेय
मित्यादिरूपरसानामनौचित्यं आभासाः पुनरेतेषां प्रस्थाने हि निर्जितो भवेत् प्राप्तिकृत्समनौचित्यमस्थानं तद्विधो
दितम् विपदे हि निरेतेषां प्रस्थानत्वमितीर्यते असम्यक्त्वमयोग्यत्वमनौचित्यं द्विधा भवेत् नातिकृत्स्नमनौ
चित्यमस्थानं तद्विधोदिते विपदे हि निरेतेषां प्रस्थानत्वमितीर्यते असम्यक्त्वमयोग्यत्वमनौचित्यं द्विधा भवे
त् अप्राणिनि भवेदाद्यं तिर्यगादिषु वा निमाम्यन्ति एतदेव क्रमेणोदाहरंति तत्र रसाभासो यथा स्तनमः
केवामालित्वणमपि विनायेन रसमेवितेभकः प्राणत्राणमुखं सुखं यस्य नायसे स्वस्तगते को जातः प्राशि
म्नि विषयमालिंगसि बलात् तपः श्रीः कसैषामदन्तगतिर्य्यायामि तत्त्वयम् अत्रानेककामुकविषयमभिलाष
मस्याः स्तनमहत्स्वादन्तुगते बहुव्यापारोपपादानेन्यतरे भावाभासो यथा राकासुधाकरमुखी तरलायता
क्षी सा स्मेरयौवनतरंगितविभ्रमास्या तत्किं करोमि विदधे कथमत्र मैत्रीं तत्स्वीकृतिव्यतिकरे क इवाभ्युपा
यः अत्र चिन्ताऽनौचित्यप्रवृत्ता आदिशब्दात् त्रियोगाः पञ्चाशत्समस्तादिष्ठं नौचित्यानौचित्यप्रवृत्तानन्तरकायाम
पि नायकस्य चित्तेऽनौचित्यम् एवमन्येषुदाहार्या अत्रेहासाद्याभासाः शंकाद्याभासाश्च भावशान्त्यादी

का॰ प्र॰ ५८ सत्त्वादिषु महमेव दीनानां नाह भावस्य शान्तिरुदयः संधिः शबलता तथा तथाः मेलनक्रमेवैतत्सर्वः एतेषां व
लक्षणस्वदाहरति ष्विवलसंते क्रमेणोदाः व्यक्तिः तस्याः सान्द्रविलेपनस्तनतटप्रश्लेषमुद्राङ्कितं किं वक्षश्चर॰
णानतिव्यतिकरव्याजेन गोपाय्यते इत्युक्ते क्व तदित्युदीर्य सहसा तत्संप्रमार्ष्टुं मया साश्लिष्टा रभसेन तत्सुखवशा
51 त्तन्व्या च तद्विस्मृतं अत्र सुखवशात्तानुभावेन कोपस्य प्रशमः नचात्र कोपस्य प्रशमेन प्रसादस्योदयः इति श
वलनेशङ्क्यं यतोऽत्र कोपस्य प्रशममपर्यवसानेन तत्प्रसादस्योदयेन तदनुभावनामवदवबोधः एवमुद
यादिष्वपि ज्ञेयम् एकस्मिन् शयने विपक्षरमणीनामग्रहे मुग्धया सद्यः कोपपराङ्मुखं ग्लपितया चाटूनि
कुर्वन्नपि आवेगादवधीरितः प्रियतमस्तूष्णीं स्थितस्तत्क्षणं मा भूत्सुप्त इवेत्यमन्दवलितग्रीवं पुनर्वीक्षितः
अत्रौत्सुक्यस्य अत्र अमन्दवलितग्रीवत्वानुभावेनौत्सुक्यस्योदयो न तु कोपस्य प्रशमस्तदनुभवानुपादाना॰
त् उत्सिक्तस्य तपःपराक्रमनिधेरभ्यागमादेकतः सत्संगप्रियता च वीररभसोत्फालश्च मां कर्षतः वैदेहीपरिर
म्भ एष च मुहुश्चैतन्यमामीलयन्नानन्दी हरिचन्दनेन्दुशिशिरः स्निग्धो रुणद्ध्यन्यतः अत्रावेगहर्षयोः अत्र भूवी॰
र्यैवेगास्नरागमः उत्सर्योर्हर्षः अत्र द्वयोस्तुल्यबलतेन संबलनात्संधिः क्वाकार्यं शशलक्ष्मणः क्व च कुलं भू
योऽपि दृश्येत सा दोषाणां प्रशमाय नः श्रुतमहो कोपेऽपि कान्तं मुखं किं वक्ष्यन्त्यपकल्मषाः कृतधियः स्वप्नेऽपि सा
दुर्लभा चेतः स्वास्थ्यमुपैहि कः खलु युवा धन्योऽधरं धास्यति अत्र वितर्कौत्सुक्यमतिस्मृतिशङ्कादैन्यधृतिचि
न्तानां शबलता क्वाकार्यं शशलक्ष्मणः क्व च कुलमित्यत्र स्मृतिरूपा विचित्रार्था वितर्क इति कथ्यते सन्देहो

यथाश्रमणीभूतोपि ब्राह्मणः प्राक्तनवृत्त्या ब्राह्मणशब्देनैवाहूयते तथा व्यंग्यत्वेनालंकार्यतां प्राप्तोप्यु
पमादिरलंकारोऽलंकारत्वेनैव व्यपदिश्यत इत्यर्थः शब्दस्य वस्तुव्यंजकतामाह वस्तुमात्रेण यथाः पंथिअ ण
एत्थ सत्थरमत्थि मणं पत्थरत्थले गामे उण्णअपओहरं पेक्खिऊण जइ वससि ता वससु अत्र यद्युपभोगक्ष
मोसि तदास्स्वेति व्यज्यते अत्र स्वयंदूतीत्वाद्यर्थैः शब्दैः संगोप्य पांथस्याभिप्रायं प्रकाशयति पथिक नात्र स्रस्त
रमस्ति मनाक् प्रस्तरस्थले ग्रामे उन्नमतः पयोधरान्प्रेक्ष्य यदि वससि तदा वसेति स्फुटः प्रकाशार्थः गोप्या
र्थस्तु पथिकेनेह स्रस्तरशाख्यमस्ति मनाक् प्रस्तरउन्नतपयोधरं प्रेक्ष्य स्थले पूर्वविबद्धेनेत्तु विदग्धनिवासे
नगरे उन्नमतः प्रादुर्भवतः पयोधरान्मेघानालोक्य यदि वससि तदा वससि गोप्यार्थेन शास्त्राभवादेवाकारेङ्गिता
नालानर्थिष्टित्वेस्मिन्ग्रामे पर्वविषये वोद्दीपने मेचके समस्त्रस्मरोत्कामिनीं दृष्ट्वा को नामोपभोगक्षमोन्यत्र यातीति
वक्त्राभिप्रायात्मकं वस्तु नैकार्थशब्दोपादानात्तु व्यज्यत इत्यर्थः तथा वाद्यालापकालकर्बलेतिवत्तु ह्यर्थ
स्य वाक्यद्वयस्य प्रकृताप्रकृतत्वात् समन्वयस्य सम्बन्धायामाशायामुपमालंकार एवाद्यापि कल्प्यते इति वाच्यं अत्रा
हि गोप्यगोपकभावेन द्वयोरर्थयोः सम्बन्धत्वमेवातः काव्योपमाकल्पनावकाश इति शनिरशनिश्चतमुच्चैर्निहन्ति कुपि
तेति नरेन्द्र यस्मै त्वम् यस्य प्रसीदसि पुनः स भवत्युदारोनुदारश्च अत्र विरुद्धावपि तदनुवर्तनार्थमे
केकार्यं कुरुत इति ध्वन्यते अत्र शनिरशनिश्चेति द्वावपि विरुद्धौ तदनुवर्तनार्थमेककार्यं हननाख्यक्रियां कुरुतः
तथोदारोनुदारश्च द्वावपि विरुद्धौ भवनक्रियामेककार्यं कुरुतः एवं शब्दशक्त्युद्भवमभिधायार्थशक्त्युद्भवमा

टी॰
का॰
५२
52

अर्थशक्त्युद्भवोप्यर्थो व्यंजकः सम्भवी स्वतः प्रौढोक्तिमात्रान्निष्पन्नो वा कवेस्तेनोम्भितस्य वा वस्तु वालंकृति
र्वेति षड्भेदो सौर्थो न कियत् वस्त्वलंकारस्य चवा तेनार्थे द्वादशात्मकः तत्र स्वतः सम्भवी तत्केवलं भणितिमा-
त्रनिष्पन्नो यावद्बहिरप्यौचित्येन सम्भाव्यमानः कविना प्रतिभामात्रेण बहिरसन्नपि निर्मितः कविनिबद्ध
निवक्त्रेति द्विविधोपयुक्तित्रिविधः वस्तु वालंकारो वेति षोढा व्यंजकः तस्य च वस्तु वाऽलंकारो वेति षो-
ढा व्यंजकः तस्य च वस्तु वालंकारो वा व्यंग्य इति द्वादशभेदोर्थशक्त्युद्भवो ध्वनिः अर्थोपि व्यंजकः सोर्थ
शक्त्युद्भवः स व्यंजकोर्थः स्वतः सम्भवी कवेः प्रौढोक्तिमात्रनिष्पन्नो वा सन्नपि बहिरसम्भवे केवलं कवेस्त
त्कारार्द्धगुणैर्वचनैर्वा केवलान्निष्पन्न इति त्रिविधः कविनिबद्धस्य नायकस्योक्तिः कथमुक्तेरपिकं सत्याणा
ग्रमोदीपिके स्यनयोरन्योन्यभेदं श्रेविध्यपि पुनः स्वतः सिद्धो व्यंजकोर्थो वस्तुरूपोऽलंकाररूपश्चेति द्विधा एवं वा विशे-
षोक्तिसिद्धोपि वस्त्वलंकाररूपाभ्यां द्विधेति षड्भेदः स व्यंजकोर्थो यदा वस्तु व्यनक्ति लंकारं वेति द्वादशभेदाः स्वतः
सम्भविनो वस्तुनो व्यंजकतामाह क्रमेणोदा॰ अलसशिरोमणिढुत्ताणअग्गिमो पुत्तिधणसमिद्धिमओ पणभा
णिएण नअंगी पफुल्लविलोचना जाता अत्र ममसेवोपभोग्य इति वस्तुना वस्तु व्यज्यते अलसशिरोमणिर्धूर्तानाम-
ग्रिमः पुत्रि धनसमृद्धिमयः इति भणितेन नतांगी प्रफुल्लविलोचना जाता अत्र स्वतः सम्भविना लोके प्रसिद्धेन
फुल्लविलोचनत्वरूपेण वस्तुभूतेनार्थेनालंकारशून्येन ममसैवोपभोग्य इति वस्तु व्यज्यते तथा बालस्तेनाप्रवा-
सितेपूर्केनेन विदग्धत्वे यत्संम्हज्ञास्ता विन्नमिति वस्तुनार्थेनार्थो व्यज्यते स्वतः सम्भविनो वस्तुनोलंकारव्यंज

ज्ञानजरठेनार्जितगर्जितेन कठिनातिबलवत्सिंहनादेन सकलेष्वरण्येयत्र क्वापि सर्वस्मिन्संग्रामे विजगात्तेः
र्वर्तितो निष्ठुरो प्रतापः धाराज्वलैः खड्गधाराकीर्तिभिर्निर्वापितो लोपितश्चेत्येकोर्थः द्वितीयस्तु कालकरः
पुणामकीर्तिश्यामो बालस्तरुणश्यामो महानम्बुवाहो मेघस्तस्य लास्यरूर्ध्वमाकाशपथेन देवतो मेघानां प्रवर्तकेन
शक्रेणार्जितस्तनितेन सकलैकलकलसहितेन तेजसोप्रतापः प्रकृष्टस्तापो निर्वापितः शीतलीकृतः अत्रा
प्रस्तुतस्य प्रतापवर्णने द्वितीयार्थस्यावृत्तस्याप्राकरणिकस्येनूर्पवर्णनसम्बद्धतयाताप्रसज्येतेति सम्बन्धावग
मायश्चाप्रस्तुतयोरुपमानोपमेयभावः कल्प्यते ततश्चात्रोपमाध्वन्यतेत्यर्थः नचात्र श्लेष एव प्रधानं किमुपमाध्व
न्यतेति शंक्यं तथा हि यत्रैकहेतुस्य प्रसवमात्र द्वावेवार्थौ प्रकृतौ तत्र श्लेषः प्रधानं यत्रैकः प्रकृतः परो
प्रकृतः तत्र शब्दशक्तिमूलोपमालंकाराध्वनिरिति व्यवस्था तथा चात्रिप एवालंकारः शब्दशक्त्या प्रकाश्यते
यत्र वस्तुमात्रं शब्देन शक्तिशब्दद्वारेण विहितमलोचनकृता यत्र शब्दशक्त्या साक्षादलंकारान्तरं वाच्यं
सत्प्रतिभासते स सर्वः श्लेषः यत्र तु शब्दशक्त्याः सामर्थ्याक्षिप्तं वाच्यव्यतिरिक्तं व्यंग्यमेवालंकारान्तरं प्रकाशते स
ध्वनेर्विषयः यत्राभिधाया एकत्र नियमितेन्तः प्राकरणिकादिर्विधीयते ततो द्वितीयस्मिन्नर्थेभिधानसंक्रामति ता
त्र द्वितीयोर्थो मा वाभिमप्रत्यायने उदाहृतश्चालंकारध्वनिः अत्रान्तरे कुसुमसमययुगमुपसंहरन्नजृम्भित
ग्रीष्माभिधानः फुल्लमल्लिकाधवलाट्टहासो महाकालः इत्यादि नचात्र कालकरालपवमहाम्बुवाहश्चमारोपणेव वि
हो किं श्लेषकल्पनयेति वाच्यं तथा सति वाच्यैव स्यात्तत्र व्यंग्यता अपि च व्यंग्योपि रूपकेवाच्यासिद्धः गुणीभू

का॰
टी॰
५२
३३

नवं भवतीव सत्यात्र शब्दशक्त्युद्भवालंकारध्वनिता । यथा नैषधे हे नृप गेहं विनाप्युद्भवमेव तवारिपोन सिद्ध्यति सा
यस्य स्यादविवदणान् । यथा वा वाच्यसिद्ध्यङ्गतामप्यगाः । तिरस्कृतविरुद्धता यो विधुरतिशाङ्कद्विजो मधुरलीलः
मतिमान् ततत्वहन्तिः प्रतिपदपलाग्रगुणो विभातिमिवान् । अत्रैकपदस्य द्विरुपादाने विरोधाभासः । विधुरताया
वैरिणां तिशाङ्कतयस्त्वक्रान्त । अत्रासंपदापदेनेनैकोऽर्थः । प्रकृतः सभंगपदेनेतद्धितीयोऽर्थोऽप्रकृतार्थः । तयो
र्नयोः सम्बन्धार्थं ना वारणाय विरोधाभासस्य चमत्कारितेन शब्दशक्त्याक्षिप्यते । विशेषणविशेष्ययोरत्तान्वयते द्वितीय
याभासो वा व्यपवदनं सम्भवतिके ऽपि विरुद्धं कान्तेऽकावारणाय सभंगपदमेवोदाहरति । अमितः समितः प्राप्तैरु
कर्षैर्हर्षदप्रभो । अहितः सहितः साधुयशोभिरसतामसि । अत्रापि विरोधाभासः । अमितः अविद्यमानामितम
त्येस्मान्नाह रूपा अपरिमिता याः स्त्र्यः । एवं विधायाः समितः संग्रामात्प्राप्तैरुत्कर्षैर्वीर्यातिशयैर्हर्षद हे प्र
भो साधुयशोभिः सहितो द्विषतामहितोऽसीति प्रकृतार्थस्य वर्णने । अमितः अपरिमितः समितः परिमितः अ
तिहितो यार्थ्ये विरोधस्य सम्बन्धः । तद्वारणाय शब्दशक्त्या त्र चमत्कारिको विरोधाभासोऽलंकारो व्यज्यते विरो
धवाचकस्योपादानेन विरोधाभासोऽलंकारः । अपिशब्दादेर्विरोधवाचकस्योपादाने विरोधाभासस्य वाच्यते आ
नुपदानेन ध्वन्यत्वेति परमार्थः । निरुपादानसम्भारमभित्तावेव तन्वते । जगच्चित्रं नमस्तस्मै कलाश्लाघ्याय श
लिने । अत्र व्यतिरेकः । अत्र प्रकृतस्य शिवस्याप्रकृतस्य चित्रस्य करात् अतिरेकालंकारो व्यङ्ग्यः । नन्वत्रालंकार
स्य भवेत् सति किमलंकार्यं तावन्न तोऽलंकारैस्तेनेत्याह । अलंकार्यस्यापि ब्राह्मणश्रमणन्यायेनालंकारता

कत्तामाह यस्मासित्या कथयसि प्रियसंगमेपि विश्रब्धवाङ्कामात्ताननिरस्तांतेरेव नीवीं प्रतिप्रणिहितेनकरेणप्रियेण।
सख्यः शपामि यदि किंचिदपि स्मरामि अत्रतम यत्नाः हेयस्येति व्यतिरेकः अत्र प्रणिहितः संपादिकः मणिक्कतया
वनीवीप्रतिप्रणिधानं प्रियेणकरेणास्वादनतापिनसमर्थाः हेसख्यइति सर्वासांमध्ये सौभाग्यमात्रहिताया:
एकस्याः सम्बोधत्वेन तथस्मासीनेकवचनेनबहूनाम् प्रत्यर्थेन प्रतिपादनात्ताया: सख्य इति बहुवचनेनतेन नामसंबन्धानि: ना
स्यां शपामीति मिथ्यानिरस्त्रमात्रेनात्र शपथार्थेन मत्तपकाल्पनेपदमिति स्लोरिकाअत्रमनः सम्भविनावाक्यार्थी
